# ॥ शास्तृ भुजङ्गस्तोत्रम् ॥

.. shAstRi bhuja NgastotraM ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : shAastabhujangastotram
File name : shaastabhujangastotram.itx
Category : bhujanga
Location : doc_deities_misc
Language : Sanskrit
Subject : Hinduism/religion/traditional
Transliterated by : Antaratma antaratma at Safe-mail.net
Proofread by : Antaratma antaratma at Safe-mail.net
Latest update : April 23, 2008
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ शास्तृ भुजङ्गस्तोत्रम् ॥

श्रितानन्दचिन्तामणिश्रीनिवासं
सदा सच्चिदानन्द पूर्णप्रकाशम् ।
उदारं सदारं सुराधारमीशं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १
विभुं वेदवेदान्तवेद्यं वरिष्टं
विभूतिप्रदं विश्रुतं ब्रह्मनिष्टम् ।
विभास्वत् प्रभावप्रभं पुष्कलेष्टं
परं ज्योतिरूपं भजे भूतनाथम् ॥ २
परित्राणदक्षं परब्रह्मसूत्रं
स्फुरच्चारुगात्रं भवध्वान्तमित्रम् ।
परं प्रेमपात्रं पवित्रं विचित्रं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ३
परेशं प्रभुं पूर्णकारुण्यरूपं
गिरीशाधिपीठोज्वलः चारुदीपम् ।
सुरेशादि संसेवितं सुप्रतापं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ४
गुरुं पूर्णलावण्य पादादिकेशं
गरिष्टं महाकोटिसूर्यप्रकाशम् ।
करांभोरुहन्यस्तवेत्रं सुरेशं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ५
हरीशान संयुक्त शक्त्येकवीरं
किरातावतारं कृपापाङ्गपूरम् ।
किरीटावतंसोज्वलत्पिञ्चबारं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ६
महायोगपीठे ज्वलन्तं महान्तं
महावाक्य सारोपदेशं सुशान्तम् ।
महर्षिप्रहर्षप्रदं ज्ञानकन्दं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ७
महारण्यमन्मानसान्तर् निवासा-
नहङ्कार दुर्वारहिम्स्रान् मृगादीन् ।
निहन्तुं किरातावतारं चरन्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ८
पृथिव्यादि भूत प्रपञ्चान्तरस्थं
पृतग् भूतचैतन्यजन्यं प्रशस्तम् ।

प्रधानं प्रमाणं पुराणं प्रसिद्धं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ९
जगज्जीवनं पावनं भावनीयं
जगद्व्यापकं दीपकं मोहनीयम् ।
सुखाधारमाधारभूतं तुरीयं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १०
इहामुत्रसत्सौख्य सम्पन्निधानं
महद्योनिमव्याहृतात्माभिधानम् ।
अहः पुण्डरीकाननं दीप्यमानं
परं ज्योतिरूपं भजे भूतनाथम् ॥ ११
त्रिकालस्थितं सुस्थिरं ज्ञानसम्स्थं
त्रिधामत्रिमूर्त्यात्मकं ब्रह्मसम्स्थम् ।
त्रयीमूर्तिमार्तिः छिदं शक्तियुक्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १२
इडां पिंगळां सत्सुषुम्नां विशन्तं
स्फुटं ब्रह्मरन्ध्र स्वतन्त्रं सुशान्तम् ।
दृढं नित्य निर्वाणमुद्भासयन्तं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १३
अनुब्रह्मपर्यन्तजीवैक्यबिम्बं
गुणाकारमत्यन्त भक्तानुकंपम् ।
अनर्घं शुभोदर्कमात्मावलम्बं
परं ज्योतिरूपं भजे भूतनाथम् ॥ १४
इति शास्तृ भुजङ्ग स्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. shAstRi bhuja NgastotraM ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*